कफः। इति राजनिर्घण्टः॥ नाटके गति-विशेषः। इति केचित्॥

सङ्घातपत्रिका, स्त्री, (सङ्घातयुक्तानि पत्राणि यस्याः। कापि अत इत्वम्।) शतपुष्पा। इति राजनिर्घण्टः॥

सङ्घुषितं,) त्रि, सम्यग्घोषणाश्रयः॥ संपूर्व्व-
सङ्घुष्टं, } घुषधातोः क्तप्रत्यये कृते वा कषा-मन्तघत्वरसंघुषास्वन इत्यनेन विकल्पेन इमा निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥ (यथा, महानिर्व्वाणतन्त्रे। १। ४।
"मत्तकोकिलसन्दोहसंघुष्टविपिनान्तरे॥")

सचिः, स्त्री, (सच समवाये + "सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) शची। इत्यमरटीकायां रामाश्रमः॥

सचिक्कणः, त्रि, क्लिन्नचक्षुः। इति शब्दरत्नावली॥

सचिवः, पुं, (सच समवाये + इन्। तथा सन् वातीति। वा + कः।) मन्त्री। सहायः। इत्यमरः॥ (यथा, देवीभागवते। २।८।४२।
"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्ष-कान्।
कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम्।
आरुरोहोत्तरासूनुः सचिवैः सह तत्क्षणम्॥")
कृष्णधत्तूरकः। इति राजनिर्घण्टः॥

सचिवामयः, पुं, (सचिवानामामयः।) विसर्पः। इति राजनिर्घण्टः॥

सची, स्त्री, (सचि + कृदिकारादिति ङीष्।) शची। इन्द्राणी। शचते व्यक्तं व्यक्ति शची शच ङ वाति तालव्यादिः। नाम्नीति इः पाच्छोणादीति पक्षे ईपि शची। कौशिकी च शची कोशातकीति वर्णादेशमालायां तालव्य-शेषु पठ्यते। सची दन्त्यादिश्च तत्र सचते आप्याययति इन्द्रमिति ष च ङ सेचने पूर्व्ववत् इः ईप् च। इत्यमरटीकायां भरतः॥ सचिः शचीति भरतद्विरूपकोषश्च॥

सचीनन्दनः, पुं, (सच्या नन्दनः।) शचीसुतः। न च जयन्तः। चैतन्यदेवः। यथा,—
"शाके मुनिव्योमयुगेन्दुगण्ये
पुण्ये तिथौ फाल्गुनपौर्णमास्याम्॥
त्रैलोक्यभाग्योदयपुण्यकीर्त्ति-
दवः सचीनन्दन आविरासीत्॥"
इति चैतन्यचन्द्रोदयनाटकम्॥

सचेष्टः, पुं, आम्रः। इति शब्दमाला॥ चेष्टया सह वर्त्तमाने, त्रि॥

सच्चारा, स्त्री, हरिद्रा। इति शब्दचन्द्रिका॥

सच्चित्, क्ली, ब्रह्म। इति मुग्धबोधव्याकरणम्॥

सच्चिदानन्दः, पुं, (सच्चासौ चिच्चासौ आनन्द-श्चेति त्रिपदे कर्म्मधारयः।) नित्यज्ञानसुख-स्वरूपं ब्रह्म। यथा,—
"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्॥"
इत्याह्निकतत्त्वम्॥

साकारदेवविशेषणे, त्रि। यथा,—
"मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।"
इत्यादि मुग्धबोधव्याकरणम्॥

सजम्बालः, त्रि, (जम्बालेन पङ्केन सह वर्त्तमानः।) पङ्किलः। इत्यमरः॥

सजातिः, पुं, (समाना जातिरस्य। समानस्य सः।) समानजातिस्त्रीपुंसोः पुत्त्रः। यथा,—
"सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः।
अनिन्द्येषु विवाहेषु पुत्त्राः सन्तानवर्द्धनाः॥"
इति मिताक्षरायां आचाराध्यायः॥
समानजातौ, त्रि॥

सजातीयः, त्रि, (जातौ भवः जातीयः। समानो जातीयः। समानस्य सः।) समानधर्म्मा-क्रान्तः। यथा,—
"सजातीयैः कुलं यूथं तिरश्चां पुं नपुंसकम्।"
इत्यमरः॥

सजूः, [स्] व्य, सहार्थः। इति शब्दरत्नावली भरतश्च॥ (यथा, भागवते। ६। १८। ६७।
"सजूरिन्द्रेण पञ्चाशत् देवास्ते मरुतोऽभवन्॥")

सजूः, [ष्] जुष सेवे + क्विप्। जुषा सह वर्त्तते इति। सहस्य सः। "सजुषो रुः।" ८। २। ६६। इति रुः। वोरिति दीर्घः।) प्रीति-युक्ता। सेवायुक्ता। इति मुग्धबोधव्याकरणम्॥ "जुषी प्रीतिसेवनयोः। जोषणं जुट् सह जुषा वर्त्तते या सा सजूः।" इति तट्टीकायां दुर्गा-दासः॥ तापसः। इति संक्षिप्तसारव्याकरणम्॥

सज्जः, त्रि, (सज्जतीति। सज्ज + अच्।) सन्नद्धः। इत्यमरः॥ सम्भृतः। इति त्रिकाण्डमेदिन्यौ॥ निभृतः। इति शब्दरत्नावली॥ सज्जायुक्तश्च॥ (यथा, महाभारते। १। २। २३२।
"ते तस्य वचनं श्रुत्वा मन्त्रयित्वा तु यद्धितम्।
सांग्रामिकं ततः सर्व्वं सज्जञ्चक्रुः परन्तपाः॥")

सज्जनं, क्ली, (सज्ज + णिच् + ल्युट्।) रक्षणार्थं सैन्यस्थानम्। चौकीति ख्यातम्। तत्पर्य्यायः। उपरक्षणम् २। इत्यमरः॥ घट्टः। इति मेदिनी॥ सज्जा च॥

सज्जनः, पुं, (सन् चासौ जनश्चेति।) सत्कुलो-द्भवः। तत्पर्य्यायः। महाकुलः २ कुलीनः ३ आर्य्यः ४ सभ्यः ५ साधुः ६। इत्यमरः॥ कुलजः ७ सब्बः ८ साधुजः ९। इति शब्द-रत्नावली॥ मेदिनीकारमते वाच्यलिङ्गोऽयम्। तल्लक्षणं यथा,—
दान्त उवाच।
"निजाचारग्राहिणो ये कुर्व्वन्तो वेदसम्मतम्।
पापाभिलाषरहिताः सज्जनास्ते प्रकीर्त्तिताः॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥
तत्सङ्गप्रशंसा यथा,—
"नलिनीदलगतजलवत्तरलं
तद्वज्जीवनमतिशयचपलम्।
क्षणमिह सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका॥"
इति श्रीशङ्कराचार्य्यकृतमोहमुद्गरः॥

सज्जना, स्त्री, (सज्ज + णिच् + ण्यासश्रन्थेति युच्। टाप्।) नायकस्यारोहणार्थं गजसज्जी-करणम्। तत्पर्य्यायः। कल्पना २। इत्य-मरः॥ (यथा, आर्य्यासप्तशत्याम्। ३१६।
"निजपदगतिगुणरञ्जितजगतां करिणाञ्च सत्कवीनाञ्च।
वहतामपि महिमानं शोभायै सज्जना एव॥")

सज्जा, स्त्री, वेशः। साज इति भाषा सन्नाहः। साँजओया इति भाषा। षस्जधातोर्भावे घञ्-प्रत्ययनिष्पन्ना। इति व्याकरणम्॥

सज्जितः, त्रि, भूषितः। कृतसज्जः। वर्म्मितः। सन्नद्धः। षस्जधातोः क्तप्रत्ययेन निष्पन्नः॥

सञ्चः, पुं, (संचिनोति वर्णानिति। सं + चि + डः।) पुस्तकलेखनार्थपत्रचयः। साँच इति भाषा। यथा,—
"श्रीताड़ीपत्रजे सञ्चे समे पत्रसुसञ्चिते।
विचित्रकं विपार्श्वे च चर्म्मणा संपुटीकृते॥
रक्तेन अथ कृष्णेन मूर्द्धन्यावर्द्धितेन च।
दृढ़सूत्रसुबन्धेन एवंविधकृतेन च॥
यस्तु द्वादशसाहस्रीं संहितामुपलेखयेत्।
ददाति चाभियुक्ताय स याति परमां गतिम्॥"
इति देवीपुराणे विद्यादानमाहात्म्यफलनामा-ध्यायः॥

सञ्चत्, पुं, ("संश्चत्तृपद्वेहत्।" उणा० २। ८५। इत्यत्र "सञ्चत्" इति पाठेन अतिप्रत्ययान्तो निपात्यते।) प्रतारकः। इति सिद्धान्तकौमुदी॥

सञ्चयः, पुं, (सञ्चीयते इति। सम् + चि + "एरच्" ३। ३। ५६। इत्यच्।) समूहः। इत्यमरः॥ यथा, कथासरित्सागरे। १८। १२८।
"तस्थौ स सेवमानस्तं राजानं स तदाश्रितः।
भुञ्जानश्च सहान्यैस्तैर्ब्राह्मणैर्ग्राससञ्चयम्॥")
संग्रहः। यथा,
"शक्तेनापि हि शूद्रेण न कार्य्यो धनसञ्चयः।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते॥"
इत्याह्निकाचारतत्त्वम्।

सञ्चयनं, क्ली, (सं + चि + ल्युट्।) सञ्चयः। यथा, संवर्त्तः।
"चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं द्विजैः।
ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते॥"
इति शुद्धितत्त्वम्।

सञ्चयी, [न्] त्रि, सञ्चयविशिष्टः। संग्रहकर्त्ता। सञ्चयशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः। यथा, सञ्चयी नावसीदति। इति महाभारतम्॥

सञ्चरः, पुं, (सञ्चरन्त्यनेनेति। सम् + चर + "गोचरसंचरेति।" ३। ३। ११९। इति घः।) सेतुः। इति त्रिकाण्डशेषः॥ सञ्चरो निर्गमो-ऽम्बुपथः। इति भरतधृतरत्नमाला॥ (मार्गः। इति सिद्धान्तकौमुदी॥ यथा, कुमारे। ६। ४३।
"यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः॥")
देहः। इति हेमचन्द्रः॥